नं: २

नम्बर २६०१

गौतमीय धर्मशास्त्र

गौ॰ धर्म

१

ॐ श्रीगणेशाय नमः ॥ अथ गौतमीय धर्मशास्त्र प्रारम्भः ॥ वेदो धर्ममूलं ॥ तद्वि
दां च स्मृतिशीले दृष्टो धर्मव्यतिक्रमः साहसं च महतां न तु दृष्टोर्थोऽवर
दौर्वल्यात् तुल्यबलविरोधे विकल्पः उपनयनं ब्राह्मणस्याष्टमे नवमे पंचमे वा
काम्यं गणसंख्या वर्णानां तद् द्वितीयं जन्म तद्यस्मात् स आचार्य वेदानु
वचनाच्च एकादशद्वादशयोः क्षत्रियवैश्ययोः आषोडशाद्ब्राह्मणस्याऽ
पतिता सावित्री द्वाविंशते राजन्यस्य द्व्यधिकाया वैश्यस्य मौञ्जीज्यामौर्वी
सौत्र्यो मेखलाः क्रमेण कृष्णरुरुबस्ताजिनानि वासांसि शाणक्षौमची
रकुतपाः सर्वेषां कार्पासं चाविकृतं काषायमप्येके वार्क्षं ब्राह्मणस्य मांऽ
जिष्ठहारिद्रे इतरयोः बैल्वपालाशौ ब्राह्मणदंडौ आश्वत्थपैलवौ शेषे य
ज्ञियो वा सर्वेषां अपीडिता यूपवक्राः सशल्का मूर्द्धललाटनासाग्रप्रमा

१

णः॥ षंडजटिलशिखा वा जटाश्च द्रव्यहस्त उछिष्टोऽनिधायाचामेत् द्रव्य
शुद्धिः॥ परिमार्ज्जनप्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदारवतांत
वानां तैजसवदुपलमणिशंखमुक्तानां दारुवदस्थिभूम्योः आवपनं
च भूमे॥ चैलवद्रज्जुविदलचर्म्मणां उत्सर्गो वात्यंतोपहतानां प्राङ्मुख
उदङ्मुखो वा शौचमारभेत॥ शुचौ देशे आसीनो दक्षिणं बाहुं जान्वं
तरा कृत्वा यज्ञोपवीत्यामणिबंधनात् पाणी प्रक्षाल्य वाग्यतो हृदयस्पृ
शस्त्रिश्चतुर्वाप आचामेत् द्विः परिमृज्यात् पादौ चाभ्युक्षेत् खानि चोपस्पृ
शेच्छीर्षण्यानि मूर्द्धनि च दद्यात् सुप्त्वा भुक्त्वा क्षुत्वा च पुनः॥ दंतश्लिष्टेषु दं
तवदन्यत्र जिह्वाभिमर्षणात् प्राक् च्युतेरित्येके॥ च्युतेष्वास्राववद्वि
द्यान्निगिरन्नेव तच्छुचिः॥ न मुख्या विप्रुष उछिष्टं कुर्वंति न चेदंगे नि

पतंति ॥ लेपगंधापकर्षणे शौचममेध्यस्य तदद्भिः पूर्वं मृदा च मूत्रपुरी
षस्नेहविस्रंसनाभ्यवहारसंयोगेषु च यत्र चाम्नायो विदध्यात् ॥ पाणि
नाऽसव्यमुपसंगृह्यानंगुष्ठमधीहि भो इत्यामंत्रयेत गुरुं ॥ तत्र च
क्षुर्मनः प्राणोपस्पर्शनं दर्भैः प्राणायामास्त्रयः पंचदशमात्राः प्र
प्राक्कूलेष्वासनं च ॐ पूर्वा व्याहृतयः पंच सत्यांताः ॥ गुरोः पादोपसं
ग्रहणं प्रातः ब्रह्मानुवचने चाद्यंतयोः अनुज्ञात उपविशेत् ॥ प्राङ्मु
खो दक्षिणतः शिष्य उदङ्मुखो वा सावित्री चानुवचनमादितो ब्रह्म
ण आदाने ॥ ओंकारोऽन्यत्रापि ॥ अंतरागमने पुनरुपसदनं ॥ श्वन
कुलसर्पमंडूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्च ॥ प्राणायामा
घृतप्राशनं चेतरेषां ॥ श्मशानाध्ययने चैवं श्मशानाध्ययने

चैव ॥ इति श्रीगौतमीये धर्मशास्त्रे प्रथमोऽध्यायः ॥ १ ॥ प्रागुपनय
यनात्कामचारवादभक्षः अहुताद्ब्रह्मचारी यथोपपादमूत्रपुरीषो भवति ॥
नास्याचमनकल्पो विद्यते अन्यत्रापमार्जनप्रधावनावोक्षणेभ्यो न तदुप
स्पर्शनादशौचं ॥ न त्वेवैनमग्निहवनबलिहरणे नियुञ्ज्यात् ॥ न ब्रह्मा
भिव्याहारयेदन्यत्र स्वधानिनयनात् ॥ उपनयनादिर्नियमः ॥ उक्तं ब्रह्म
चर्यमग्नीन्धनभैक्षचरणे सत्यवचनं ॥ अपामुपस्पर्शनं ॥ एके गोदा
नादि बहिः संध्यत्वं च ॥ तिष्ठेत्पूर्वामासीतोत्तरां सज्योतिष्याज्योतिषो द
र्शनाद्वाग्यतः ॥ नादित्यमीक्षेत वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्नां
जनाभ्यंजनयानोपानच्छत्रकामक्रोधलोभमोहवादवादनस्नानदंतधाव
नहर्षनृत्यगीतपरिवादभयानि ॥ गुरुदर्शने कंठप्रावृतावसक्थिकापा

गौ॰ ध॰
२

अयनपादप्रसारणानि ॥ निष्ठीवितहसितविजृंभितास्फोटनानि ॥ स्त्री- शास्त्र
प्रेक्षणालंभने मैथुनशंकायां द्यूतं हीनसेवामदत्तादानं हिंसां ॥ आचा-
र्यतत्पुत्रस्त्रीदीक्षितनामानि ॥ शुक्लां वाचं मद्यं नित्यं ब्राह्मणः ॥ अधश्श-
य्यासनीत्थायी संवेशी वाक्बाहूदरकर्मसंयतः ॥ नामगोत्रे गुरोः
समानतो न निर्दिशेत् ॥ अर्चिते श्रेयसि चैवं शय्यासनस्थानानि विहा-
य प्रतिश्रवणं अभिक्रमणं वचनाद्दृष्टेन अधस्थानासनस्तिर्य-
ग्वातसेवायां ॥ गुरुदर्शने चोत्तिष्ठेत् ॥ गच्छंतमनुव्रजेत् ॥ कर्म वि-
ज्ञाप्याख्याय आहूताध्यायी युक्तः प्रियहितयोः तद्भार्यापुत्रेषु चै-
वं ॥ नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रह-
णानि विप्रोष्योपसंग्रहणं गुरुभार्यायां तत्पुत्रस्य च ॥ नैके यु-

वतीनांयवहारप्राप्तेनसार्ववर्णिकंभैक्षचरणमभिशस्तपतितवर्जं॥आ
दिमध्यान्तेषुभवच्छब्दःप्रयोज्योवर्णानुपूर्व्येण॥आचार्यज्ञातिगुरु
स्वेष्वलाभेऽन्यत्रातेषांपूर्वंपूर्वंपरिहरेत्॥निवेद्यगुरवेऽनुज्ञातो
भुंजीत॥असंनिधौतद्भार्यापुत्रसब्रह्मचारीसद्भ्यः॥वाग्यतस्तृप्य
न्नलोलुप्यमानःसंनिधायोदकंशिष्यशिष्टिरवधेनाऽशक्तौरज्जुवे
णुविदलाभ्यांतनुभ्यामन्येनघ्नन्राज्ञाशास्यः॥द्वादशवर्षाण्ये
कवेदेब्रह्मचर्य्यंचरेत्॥प्रतिद्वादशवासर्वेषुग्रहणान्तंवाविद्यान्ते
गुरुरर्थेननिमंत्र्यःकृत्वानुज्ञातस्यवास्नानं॥आचार्यःश्रेष्ठोगु
रूणांमातेत्येकेमातेत्येके॥इतिश्रीगौतमीयेद्वितीयोऽध्यायः
॥२॥तस्याश्रमविकल्पमेकेब्रुवते॥ब्रह्मचारीगृहस्थोभिक्षुर्वैखान

गौ॰ध॰ ४ सइति॥ तेषां गृहस्थो योनिरप्रजनन्त्वादितरेषां॥ तत्रोक्तब्रह्मचारी॥ शास्त्र

॥आचार्याधीनत्वमांत्यं गुरोः कर्मशेषेण जपेत्॥ गुर्वभावे तद ३

पत्ये वृत्तिस्तदभावे वृद्धे सब्रह्मचारिण्यग्नौ वा॥ एवंवृत्तो ब्रह्मलोक

मवाप्नोति जितेंद्रियः उत्तरेषां चैतदविरोधि॥ अनिचयो भिक्षुः॥

ऊर्द्ध्वरेताः ध्रुवशीलो वर्षासु भिक्षार्थी ग्राममियात्॥ जघन्यमनिवृ

त्तं चरेत्॥ निवृत्ताशीर्वाक्चक्षुः कर्मसंयतः कौपीनाच्छादनार्थे वा

सो बिभृयात्॥ प्रहीणमेके निर्णिज्याविप्रयुक्तमोषधिवनस्पतीनामंग न

द्दीत मुपा॰न द्वितीयामपर्तुरात्रिं ग्रामे वसेत्॥ मुंडः शिखी वा वर्जयेद्बीज

वधं॥ समो भूतेषु हिंसानुग्रहयोरनारंभी॥ वैखान॰ ब॰ने मूलफ सो

लाशी तपःशीलः॥ श्रावणकेनाग्निमाधाय॥ अग्राम्यभोजी॥ दे

वपितृमनुष्यभूतर्षिपूजकः ॥ सर्वातिथिः प्रतिषिद्धवर्जं ॥ भैक्षमप्युपयुंजीत
न फालकृष्टमधितिष्ठेत् ॥ ग्रामं च न प्रविशेत् ॥ जटिलश्चीराजिनवासाः ॥
नातिसांवत्सरं भुंजीत ॥ ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्य
स्य गार्हस्थ्यस्य ॥ इति श्रीगौतमीये तृतीयोऽध्यायः ॥ ३ ॥ (भवतां मात
वो धर्मः सांगा वेदाश्चिकित्सितं ॥ आज्ञासिद्धानि चत्वारि न हंतव्यानि
युक्तिभिः) गृहस्थः सदृशीं भार्यां विंदेतानन्यपूर्वां यवीयसीमसमान
प्रवरैर्विवाहः ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च ॥ मातृबंधुभ्यः पंच
मात् ब्राह्मो विद्याचारित्रबंधुशीलसंपन्नाय दद्यादाच्छाद्यालंकृतां संयो
गमंत्रः प्राजापत्ये सह धर्मश्चर्यतामिति ॥ आर्षे गोमिथुनं कन्याव
ते दद्यात् ॥ अंतर्वेद्यृत्विजे दानं दैवः ॥ अलंकृत्येच्छंत्याः स्वयं संयोगो गां

गौ॰ ध॰ गांधर्वः॥ वित्तेनानतिस्त्रीमतामासुरः॥ प्रसह्यादानाद्राक्षसः॥ असंवि शास्त्र
५ ज्ञातोपसंगमनात्पैशाचः॥ चत्वारो धर्म्याः प्रथमाः षडित्येके॥ अ ४
नुलोमानंतरैकांतरद्व्यंतरासु जाताः सवर्णांबष्ठोग्रनिषाददौष्यंत
पारशवाः॥ प्रतिलोमास्तु सूतमागधायोगवक्षत्तृवैदेहकचांडालाः॥ ब्रा
ह्मण्यजीजनत्पुत्रान्वर्णेभ्य आनुपूर्व्यात्॥ ब्राह्मणसूतमागधचंडा
लान् तेभ्य एव क्षत्रिया मूर्द्धावसिक्तक्षत्रियधीवरपुल्कसान् तेभ्य एव वै
श्या भृज्जकंठमाहिष्यवैश्यवैदेहान्· तेभ्य एव पारशवयवनकरणाञ्छू
द्रान् शूद्रेत्येके॥ वर्णांतरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन पंचमे
नवाचार्याः॥ सृष्ट्यंतरजातानां च॥ प्रतिलोमास्तु धर्महीनाः॥ शूद्रायां
चासमानायां च शूद्रात्पतितवृत्तिः॥ अंत्यः पापिष्ठः॥ पुनाति ५

साधवः पुत्राः॥ त्रीञ्छ्रुत्यानार्षा दश दैवाद्दशैव प्राजापत्यात् दश पूर्वान्द
श परानात्मानं च ब्राह्मीपुत्रा ब्राह्मीपुत्राः॥ इति गौतमीये धर्मशास्त्रे चतुर्थोऽध्या
यः॥ ४ ॥ ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जं॥ देवपितृमनुष्यभूतर्षि
पूजकः नित्यः स्वाध्यायः पितृभ्यश्चोदकदानं॥ यथोत्साहमन्यद्भा
र्यादिरग्निर्दायादिर्वा तस्मिन्गृह्याणि देवपितृमनुष्ययज्ञाः स्वा
ध्यायश्च॥ बलिकर्म अग्नावग्निर्धन्वंतरिर्विश्वेदेवाः प्रजापतिः स्विष्ट
कृदिति होमः दिग्देवताभ्यश्च यथास्वं द्वारेषु मरुद्भ्यो गृहदेवताभ्यः॥
प्रविश्य ब्रह्मणे मध्ये अद्भ्य उदकुंभे॥ आकाशायेत्यंतरिक्षे नक्तंच
रेभ्यश्च सायं॥ स्वस्तिवाच्य भिक्षादानमप्पूर्वं ददाति षु चैवं धर्म्ये
षु॥ समद्विगुणसाहस्रानंत्यानि फलान्यब्राह्मणब्राह्मणश्रोत्रिय

वेदपारगोऽल्पः ॥ गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्यय
नाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागो बहिर्वेदि भिक्षमाणेषु कृ
तान्नमितरेषु प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात् क्रुद्धहृष्ट
भीतार्तलु [illegible] विरमूढमत्तोन्मत्तवाक्यान्यनृतान्यपातका
नि ॥ भोज [illegible] तिथिकुमारव्याधितगर्भिणीस्ववासिनीस्थ
विराञ्जघन्यांश्च आचार्यपितृसखीनां च निवेद्य वचनक्रि
या ऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुपस्थाने मधुपर्कः
संवत्सरे पुनर्यज्ञविवाहयोरर्वाक् राज्ञश्च श्रोत्रियस्य अश्रोत्रिय
स्यासनोदके ॥ श्रोत्रियस्य तु पाद्यमर्घ्यमन्नविशेषांश्च प्रकारये
त् ॥ नित्यं वा संस्कारविशिष्टं ॥ मध्यतोऽन्नदानमवैद्ये साधुवृत्ते

विपरीतेतुतत्पुरुषोदकतूमिः स्वागमेंततः ॥ज्ञानत्याशश्च भाव्यासनावं
सप्याबज्योणासनानिसहदक्षश्रेयसोःसन्नानानिश्चल्पशोपिहीनेश्चस
मानग्रामोतिधियिरेकराविकोधिद्रसस्तयोंपल्लवीकुशलानामयारोग्य
णांश्मनुप्रश्नोत्यं ॥ ददस्यब्राह्मणस्यानतिधियिरब्राह्मणोयज्ञैसंवृतश्चेत्
तोजनंतृदलविषय्योर्श्वमलणोल्पः ॥ श्चचातल्लत्येःसहात्वशंसाध्य
इति मात्वर्ण्शंसाद्य ॥ गूणोनामैवपंचमोऽध्यायः ॥ ५ ॥ पाक्षेपसंगृह
णंसमवायेद्वहंश्चालिगम्यन्तुविशेष्यमात्वपित्वत्वदंपूताश्चतेजा
नांविद्यागुणांतनुरूणांनसंनिधानेपरस्यस्वनामशेत्याहमय
मित्यलिवादेजसमवाये स्त्रीपुंयोगेलिवादतोनियममेके ना
विशेष्यस्त्रीणांममात्वपित्वव्यतायांतगिनीनांतोपसंग्रहणं

गौ० ध० ७

भ्रातृभार्याणां श्वश्रूणां च ज्ञात्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां शा०ह्व
प्रत्युत्थानमनभिवाद्याः ॥ तथान्यः पूर्वः पौरोऽशीतिकावरः शूद्रोऽप्य ६
पत्यसमेन ॥ अवरोऽप्यार्यः शूद्रेण नाम चास्य वर्जयेत् ॥ राज्ञश्चा
जपः प्रेष्यः भोभवन्निति वयस्यः समानेहनि जातो० दशवर्षवृद्धः पौ
रः ॥ पंचभिः कलाधरः ॥ श्रोत्रियश्चारणस्त्रिभिः ॥ राजन्यवैश्यकर्म
विद्याहीनाः दीक्षितश्च प्राक्क्रयात्० वित्तबंधुकर्मजातिविद्यावयांसि
मान्यानि परबलीयांसि० श्रुतं तु सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्म
स्य श्रुतेश्च० चक्रिदशमीस्थानुग्राह्यवधूस्नातकराजभ्यः पथोदानं रा
ज्ञा तु श्रोत्रियाय श्रोत्रियाय ॥ इति गौतमीये षष्ठोऽध्यायः
॥ ६ ॥ आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं

शुश्रूषा-समाप्ते ब्राह्मणो गुरुः॥ याजनाध्यापनप्रतिग्रहाः॥ सर्वेषां॥
पूर्वः पूर्वो गुरुः॥ तदलाभे क्षत्रवृत्तिः॥ तदलाभे वैश्यवृत्तिः॥ तस्याप
ण्यं गंधरसकृतान्नतिलशाणक्षौमाजिनानि-रक्तनिर्णिक्ते
वाससी॥ क्षीरं सविकारं-मूलफलपुष्पौषधमधुमांसतृणोदका
पथ्यानि पशवश्च हिंसासंयोगे पुरुषवशाकुमारीवेहतश्च भूमि नित्य
व्रीहियवाजाव्यश्वर्षभधेन्वनडुहश्चैके विनिमयस्तु रसानां रसैः प
शूनां च न लवणकृतान्नयोस्तिलानां च समेनामेन तु पक्वस्य सं
प्रत्यर्थे सर्वथा तु वृत्तिरशक्तावशौद्रेण तदप्येके प्राणसंशये
तद्वर्णसंकराभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि शस्त्रमाद
दीत राजन्यो वैश्यकर्म वैश्यकर्म॥ इति गौतमीये सप्तमोऽध्यायः॥

गौ·ध·
८

[illegible]

द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुतः ॥ तयोः

श्चतुर्विधस्य मनुष्यजातस्यांतःसंज्ञानां चलनपतनसर्पणा

नामायत्तं जीवनं ॥ प्रसूतीरक्षणमसंकरो धर्मः ॥ स ‐ एष बहुश्रुतो

भवति ॥ लोकवेदवेदांगवित् वाकोवाक्येतिहासपुराणकुशलस्त

दपेक्षस्तद्वृत्तिः ॥ चत्वारिंशता संस्कारैः संस्कृतः त्रिषु कर्मस्वभि

रतः षट्सु वा सामयाचारिकेष्वभिविनीतः षड्भिः परिहार्यो राज्ञा

वध्यश्चाबंध्यश्चादंड्यश्चाबहिष्कार्यश्चापरिवाद्यश्चापरिहार्य

श्चेति ॥ गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणा

न्नप्राशनचौडोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारि

शास्त्र
८

8

णीसयोगः॥ पंचानांयज्ञानामनुष्ठानंदेवपितृमनुष्यभूतब्रह्मणा
मेतेषांचअष्टकापार्वणश्राद्धंश्रावण्याग्रहायणीफाल्गुनीचैत्र्या
श्वयुजीतिसप्तपाकयज्ञसंस्थाः अग्न्याधेयमग्निहोत्रंदर्शपूर्णमा
सौआग्रयणंचातुर्मास्यानिनिरूढपशुबंधः सौत्रामणीतिसप्त
हविर्यज्ञसंस्थाः॥ अग्निष्टोमोत्यग्निष्टोमउक्थः षोडशीवाज
पेयोतिरात्रो॥ अप्तोर्यामइतिसप्तसोमसंस्थाः॥ इत्येतेचत्वारिंश
त्संस्काराः अथाष्टावात्मगुणाः॥ दयासर्वभूतेषुक्षांतिरनसूया
शौचमनायासोमंगलमकार्पण्यमस्पृहेति यस्यैतेचत्वारिंशत्
संस्काराः नचाष्टावात्मगुणानसब्रह्मणः सालोक्यंसायुज्यं
चगच्छति॥ यस्यतुखलुसंस्काराणामेकदेशोप्यष्टावात्मगुणाः

गौ॰ ध॰ ९ अथ सब्रह्मणः सालोक्यं सायुज्यं च गच्छति गच्छति ॥ इति गौतमीये धर्म शास्त्र ९
ष्टमोऽध्यायः ॥ ८ ॥ स विधिपूर्वं स्नात्वा भार्यामधिगम्य यथोक्ता
न् गृहस्थधर्मान् प्रयुंजान इमानि व्रतान्यनुकर्षेत् ॥ स्नातकः नि
त्यं शुचिः सुगंधिः स्नानशीलः ॥ सति विभवे न जीर्णमलवद्वासाः
स्यात् न रक्तमुल्बणमन्यधृतं वा वासो बिभृयात् ॥ न स्रगुपानहौ
निर्णिक्तमशक्तौ न रूढश्मश्रुरकस्मान्नाग्निमपश्च युगपद्धारयेत्
नापो मेध्येन संसृजेत् । नांजलिना पिबेत् । न तिष्ठन् । नुद्धृतो
दकेनाचामेत् । न शूद्राशुच्येकपाण्यावर्जितेन ॥ न वाय्वग्नि
विप्रादित्यापो देवता गाश्च प्रति पश्यन्वा मूत्रपुरीषामेध्यानु
दस्येत् ॥ नैता देवताः प्रति पादौ प्रसारयेत् ॥ न पर्णलोष्टाश्म

9

लिःसुखंशरीरस्यापकर्षणंकुर्यात्॥नभस्मकेशनखतुषकपाला
मेध्यान्यधितिष्ठेत्॰नम्लेछान्त्यजाधार्मिकैःसहसंलापेत्नसं
लाप्यपुण्यकृतोमनसाध्यायेत्॥ब्राह्मणेनवासहसंलापे
त॥अधेनुंधेनुभव्येतिब्रूयात्॥अभद्रंभद्रमिति॥कपालंभ
गालमिति॥मणिधनुरिन्द्रधनुः॥गांधयन्तींपरस्मैनाच
क्षीत॥नचैनांवारयेत्॥नमिथुनीभूत्वाशौचंविलंघयेत्॥ प्रति
नचतस्मिन्शयनेस्वाध्यायमधीयीत॥नचापररात्रमधी
त्यपुनःसंविशेत्॥नाकल्यांनारीमभिरमयेत्॥नरजस्व
लां॥नचैनांश्लिष्येत्॥नकन्यां॥अग्निमुखोपधमनविग्र
ह्यवादबहिर्गन्धमाल्यधारणं॰पापीयसावलेखनभार्यास

गौ. ध. ह्लोजनांजंन्त्यवेक्षणं॰ ऊद्धारप्रवेशनपादपादधावनासं श्रीरा
१० दीरुहलोजननदीवाऊनरणवृक्षविषमारोहणावरोहणाप्रा ६
णव्यायछनानिवर्जयेत्॥नासंदिग्धांनावमाधिरोहेत्तस
र्वतश्चात्मानंगोपायेत्॥नप्रावृत्त्यशिरोहनिपर्यटेत्॥प्रा
वृत्त्यरात्रौमस्तकोद्वारेचनन्सुमावनंनद्वीयात्॥नाराज्ञावसथा
त्॥नभस्मकरीषकृष्टछायापथिकाम्येषुलेमूत्रपुरीषेदवा
कुर्यात्।उदङ्मुखःसंध्ययोश्च॥रात्रौदक्षिणामुखः॥पालाश
मासनंपादुकेदंतधावनमितिचवर्जयेत्॥सोपानत्कश्चाश
नासनाभिवादननमस्कारानवर्जयेत्॥नपूर्वाह्नमध्यं
दिनापराह्णानफलान्कुर्यात्यथाशक्तिधर्मार्थकामेभ्यः॥

नेषुत्तुधर्मोनरःस्यात् ॥ ननग्नांपरयोषितमीक्षेत ॥ नपदासनमा
कर्षेत् ॥ नाशिश्नोदरपाणिपादवाक्चक्षुश्चापलानिकुर्यात्
॥ छेदनलेखनविलेखनविमर्दनावस्फोटनानिनाकस्मात्कुर्या
त् ॥ नोपरिवत्सतंत्रींगच्छेत् ॥ नकुलंकुलःस्यात् ॥ नयज्ञमवृतो
गच्छेत् ॥ दर्शनायतुकामं ॥ नलङ्घ्यात्तुत्संगेलङ्घयेत् ॥ नरात्रौप्रे
ष्याहृतमुद्धृतंस्नेहविलयंपिण्याकमथितप्रभृतीनिचाश्
नीयात् ॥ सायंप्रातस्त्वन्नमभिपूजितमनिंद
न्भुंजीत ॥ नकदाचिद्रात्रौनग्नःस्वपेत् ॥ स्नायाद्वायथात्मवंत
वद्वाःसम्यग्विनीतादंभलोभमोहवियुक्तावेदविदआचक्ष
तेतदाचरेत् ॥ योगक्षेमार्थमीश्वरमधिगच्छेत् ॥ नान्य

गौ॰ध॰ म्न्यत्र देवगुरुधार्मिकल्प: ॥ अप्रतैपोदकं यवसकुशमाल्योपनि शास्त्र
११ ष्क्रमणं नार्यजनं तु पिष्ट मनलास समष्टं धार्मिकाधिष्ठितं नि ९
केतनमावसितुं प्रयतेत ॥ प्रशस्तमंगल्यदेवतायतनचतुष्पथा
न् प्रदक्षिणमावर्तेत मनसा वा तत्समग्रमाचारमनुपाल
येदापत्कल्पः ॥ सत्यधर्मार्यवृत्तः शिष्टाध्यापकः शौच
शिष्टः श्रुतिनिरतः स्यात् ॥ नित्यमहिंस्रो मृदुर्दृढकारी द
मदानशीलः ॥ एवमाचारो मातापितरौ पूर्वापरांश्च संबं
धान् दुरितेभ्यो मोक्षयिष्यन् स्नातकः सदा ब्रह्मलोकान्न च्यव
ते न च्यवते ॥ इति गौतमीये नवमोऽध्यायः ॥ ९ ॥ प्रथ
मः पाठकः ॥ ॥ द्विजातीनामध्ययनमिज्या दानं ब्रा

ह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः ॥ पूर्वेषु नियमस्तु
॥ आचार्यज्ञातिप्रियगुरुधनविद्यानियमे ॥ ब्राह्मणः सं
प्रदानमन्यत्र यथोक्तात् ॥ कृषिवाणिज्ये वा स्वयंकृते ॥ कुसी
दं च ॥ राज्ञोऽधिकं रक्षणं सर्वभूतानां न्याय्यदंडत्वं बिभृया
द् ब्राह्मणान् श्रोत्रियान् निरुत्साहांश्च ॥ ब्राह्मणानकरांश्चो
पकुर्वाणांश्च ॥ योगश्च विजये भये विशेषेण चर्या च रथधनु
र्भ्यां संग्रामे संस्थानमनिवृत्तिश्च ॥ न दोषो हिंसायामाह
वे ॥ अन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्णकेशपराङ्मु
खोपविष्टस्थलवृक्षाधिरूढदूतगोब्राह्मणवादिभ्यः ॥ क्षत्रि
यश्चेदन्यस्तमुपजीवेत्तद्वृत्तिः स्यात् ॥ जेता लभेत सांग्रामि

गौ॰ध॰ कंविन्नं॥ वाहतंनुराज्ञः॥ नुद्धारश्चाएष्वकुंजये॥ यच्चाहंला शास्त्र
१२ जये धुजान्रा ज्ञेबलि दानंकर्षकैः दशममष्टमं षष्ठंवा॥ १॰
पशुहिरण्ययोरुप्येके पंचाशद्भागं विंपातिलाग ः शुल्कं
परायम्रलफलमधुमासपुष्पौषधत्रणं धनानापर्वंतद्दत्वाण ग्रेर्मि
त्वात्तेशुश्रुनित्ययुक्तास्यात्॥ अधिकेनवृत्तिः॥ शिल्पिनोमासिमा
स्येकैकंकर्मकुर्युः॥ एतेनात्मोपजीविनोव्याख्याताः॥ नौचक्रिवं
तश्चालक्तेभ्योपिदद्यात्॥ परायंव गितरर्घापचयेनदेयं॥ प्रणष्ट
लि अस्वामिकमधिगम्य राज्ञेप्रब्रूयुः॥ विख्याप्यसंवत्सरं राज्ञा रक्ष्यं
ख्य ॥ नूर्ध्वमधिगंतुश्चतुर्थंराज्ञःशेषं॥ स्वामीरिक्थक्रयसंविभाग
परिग्रहाधिगमेषु॥ ब्राह्मणस्याधिकलब्धं नाक्षत्रियस्याविजितानि

वै

विंशं स्ववशस्त्रयोः ॥ निध्यधिगमो राजधनं ॥ ब्राह्मणस्याभिरूपस्य । क्ष
त्राह्मणोप्याख्याता षष्ठं लभेतेत्येके ॥ चारहृतमपजित्य यथास्थानं वा
गमयेत् ॥ कोशाद्वा दद्यात् ॥ रक्ष्यं बालधनं माव्यवहारप्रापणात् समावृ
र्वा वैश्यस्याधिकं कृषिवाणिक्पाशुपाल्यं कुसीदं च शूद्रश्चतुर्थो वर्णः
एकजातिः तस्यापि सत्यमक्रोधः शौचं आचमनार्थे पाणिपादप्रक्षा
लनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषां ते
भ्यो वृत्तिं लिप्सेत जीर्णान्युपानच्छत्रवासः कूर्चान्युच्छिष्टाशनं शि
ल्पवृत्तिश्च यं चार्यमाश्रयेत् भर्तव्यस्तेन क्षीणोपि तेन चोत्तरः तद
र्थोस्य निचयः स्यात् अनुज्ञातोस्य नमस्कारो मन्त्रः पाकयज्ञैः
स्वयं यजेतेत्येके सर्वे चोत्तरोत्तरं परिचरेयुः ॥ आर्यानार्ययोर्व्यतिक्र

गौ०ध०
१३

द्वैपे कर्म्मणः साम्यं साम्यं ॥ इति गौतमीये दशमोऽध्यायः ॥ १० ॥ शास्त्र
राजा सर्व्वस्येष्टे ब्राह्मणवर्जं ॥ साधुकारी स्यात् साधुवादी त्रय्यामा ११
न्वीक्षिक्यां चाभिविनीतः साधु ॥ शुचिर्जितेन्द्रियो गुणवत्सहायोप
पायसंपन्न ॥ समः प्रजासु स्यात् ॥ हितं चासां कुर्वीत ॥ पर्यासीनम तमु ४
धस्तादुपासीरन्नन्ये ब्राह्मणेभ्यस्तेप्येनं मन्येरन् ॥ वर्णानाश्रमांश्च
न्यायतोऽभिरक्षेत् ॥ चलतश्चैतान् स्वधर्म्मे स्थापयेत् ॥ धर्म्मस्य ह्यंश
भाग्भवतीति विज्ञायते ॥ ब्राह्मणं च पुरोदधीत ॥ विद्याभिजनवा
ग्रूपवयःशीलसंपन्नं न्यायवृत्तं तपस्विनं ॥ तत्प्रसूतः कर्म्माणि कु
र्वीत ॥ ब्रह्मप्रसूतं हि क्षत्त्रमृध्यते ॥ न व्यथत इति च विज्ञायते ॥ या
नि च दैवोत्पातचिंतकाः प्रब्रूयुस्तान्याद्रियेत तदधीनमपि ह्ये

त्ययना

केयोगक्षेमं प्रतिजानते ॥ स्थां त्रिपुरण्याह स्व[illegible] पुष्पमंगलयुक्तास्याम्पु
द्रायिकाणिविधेयरागस्त्वं लननानातिवारा द्विघवद्धियुक्ता किंच शालाग्नौ
कुर्यात् यथोक्तम् जोत्याणि तस्य व्यवहारः दो धर्मशास्त्राराधंशात्पु
पवेद्यः प्रपारणं · देशजातिकुल धर्मा श्चाम्नायैरविरुद्धाः प्रमाणं
कर्षकवणिक्पशुपालकुसीदिकारवः स्वेस्वे वर्गे ॥ तेल्पोपयथा धिका
समर्थ्या प्रत्यवहृत्य धर्मव्यवस्था · न्यायाधिगमेतर्कोल्पुपायः ते
नाल्पस्यय[illegible] ज्ञानमाक्रमयेत् ॥ विप्रतिपत्तौ त्रैविद्यरूद्धेत्यः प्रत्यव
त्यति ष्ठां गमयेत् ॥ तपान्वस्याति श्रेयसंभवति ॥ ब्रह्मस्वयैरायसंपृक्तं देवपि
त्र्यमनुष्यान् धारयतीतीतिविज्ञायते । दंडो दमनादित्याहुस्तेनादांत
न्दमयेत् ॥ वर्णाश्रमाश्चमाश्च स्वकर्मनिष्ठाप्रेत्यकर्मफलमनुभूयतत:

गौ. ध.
१४

14

शेषेणविशिष्टदेशजातिकुलरूपायुश्रुतवित्तवृत्तसुखमेधसोजन्म शास्त्र
प्रतिपद्यन्ते॥ विष्वंचोविपरीतानश्यंति॥ तानाचार्योपदेशोदंडश्चपाल २९
यते॥ तस्माद्राजाचार्यावनिंद्यावनिंद्यौ॥ इतिगौतमीये एकादशोऽ
ध्यायः॥ १२॥ शूद्रोद्विजातीनतिसंधायाभिहत्यचवाग्दंडपारु
ष्याभ्यामंगंमोच्योयेनोपहन्यात्॥ आर्यस्त्र्यभिगमनेलिंगोद्धा
रः स्वहरणंचगोप्ताचेद्वधोधिकः॥ अथहास्यवेदमुपशृण्वतःत्रपु
जतुभ्यांश्रोत्रप्रतिपूरणं॥ उदाहरणेजिह्वाछेदः॥ धारणेशरीर
भेदः॥ आसनशयनवाक्पथिषुसमप्रेप्सुर्दंड्यःशतं॥ क्षत्रियोब्रा
ह्मणाक्रोशे॥ दंडपारुष्येद्विगुणं॥ अध्यर्धंवैश्यः॥ ब्राह्मणस्तुक्षत्रियेपंचाशत॥ तदर्धं
वैश्ये॥ नशूद्रेकिंचित॥ ब्राह्मणराजन्यवत्क्षत्रियवैश्यौ॥ अष्टा

पादं त्रियाकिल्बिषं मृद्भूस्य • द्विगुणस्येतराराविहरे यां प्रतिवर्शां • वि
ड्डुयोनिक्रमे दंड रूयस्त्वं ॥ फलहृत धान्यशाकादाने पंचकृष्ण
लमल्पे • पशुपीडिते स्वामिदोषः पालसंयुक्ते तु तस्मिन् • पथि क्षे
त्रे ऽनावृते पालदोषे विक्रयोः पंचमाषा गवि षड्दूरवरे अश्वमहि
ष्यो दश अजाविकुते द्वौ द्वौ सर्वविनाशे शदः शिष्टाकरणे प्रति
षिद्धसेवायां च नित्यं चेलपिंडाद्दूंत स्वहरणे • गोत्रपर्योत्पन्ने धाची
वधवनस्पतीनां च पुष्पाण्यस्ववदादीत ॥ फलानि चापरिवृतानां
कृत्तीदह्वाद्विर्द्विर्यर्वा विंशतिः पंचमाषिकीमासं • नातिसंवत्सरमेको
चितदृष्टानेवे गुण्यं प्रयोगस्याभुक्ताधिर्नविक्रीते ॥ दित्सतो वहद्र
व्यच ॥ चक्रकालवृद्धिः ॥ कारिताकायिका शिखबाऽधितोगाप्र

गौ॰ ध॰ ॥ कुसीदंपशुपण्यलोमदेवब्राह्मणद्रव्येषु नातिपंचगुणं ॥ अजडापोगंड शास्त्र
१५ धनंदशवर्षभुक्तंपरैः सन्निधौ भोक्तुः ॥ न श्रोत्रियप्रव्रजितराजपुरुषैः ९९
॥ पशुभूमिस्त्रीणामनतिभोगः ॥ रिक्थभाजऋणंप्रतिकुर्युः ॥ प्राति
व भाव्यवणिक्शुल्कमद्यद्यूतदंडान्पुत्रान्नाध्याभवेयुः ॥ निध्यन्वाधियाचि
तावक्रीता आधयोनष्टाः सर्वानानिंदितान्पुरुषापराधेन स्तेनः प्रकी
र्णकेशो मुसलीराजानमियात्कर्माचक्षाणः ॥ पूतोवधमोक्षाभ्यां
अघ्नन्नेनस्वीराजा न शारीरोब्राह्मणदंडः ॥ कर्मवियोगविख्यापनवि
वासनांककरणानि ॥ अप्रवृत्तौप्रायश्चित्ती सः चोरसमः सचिवो
मतिपूर्वे ॥ प्रातिग्रहीताप्यधर्मसंयुक्ते पुरुषशक्त्यपराधानुबंध
विज्ञानाद्दंडनियोगः ॥ अनुज्ञानं वा वेदवित्समवायवचना

त्वेदवितीसमवायवचनात् ॥ इति गौतमीये द्वादशोऽध्यायः ॥ १२
॥ विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था ॥ बहवः स्युरनिंदिता
स्वकर्मसु प्रात्ययिका राज्ञां निष्प्रीत्यनभितापाश्चान्यतरस्मि
न्नपि शूद्राः ॥ ब्राह्मणस्त्वब्राह्मणवचनात् अनवरोध्योऽनिबद्धश्चे
त् नासमवेताः पृष्टाः प्रब्रूयुः ॥ अवचने च दोषिणः स्युः ॥ स्व
र्गः सत्यवचने विपर्यये नरकः ॥ अनिबद्धैरपि वक्तव्यं ॥ न पीडाकृ
ते निर्बंधः ॥ प्रमत्तोक्ते च साक्षिसभ्यराजकर्तृषु दोषो धर्मतंत्र
पीडायां ॥ शपथेनैके सत्यकर्म तद्देवराजब्राह्मणसंसदि स्या
त् अब्राह्मणानां क्षुद्रपश्वनृते साक्षी दश हंति गोऽश्वपुरुष
भूमिषु दशगुणोत्तरान् ॥ सर्वं वा भूमौ हरणे नरकः ॥ अ

पशुमैथुनसंयोगेषु चाप्य श्ववत्स धुसार्थिषो॥ गोवत्त वस्त्र हिरण्य
धान्य ब्रह्म स्तुयानेष्व प्यवत॥ मिथ्यावचने गार्थ्यो दंडस्र्म्यसार
लीनाच्च त्ववचने दोषो जीवनं चेत्तद धीनं॥ नतु पापीयसो जी
वनं॥ राजा प्राड्विवाको ब्राह्मणो वा शास्त्रवित्स्यात् प्राड्विवाकमध्या
त्ववेरत्न॥ संवत्सरं प्रतीक्षेत प्रतिभायां धेन्वनडुत्स्त्री प्रजनसं
युक्तेषु शीघ्रं॥ आत्ययिके च· सर्वधर्मेभ्यो गरीयः प्राड्विवाके
सत्यवचनं सत्यवचनं॥ इति गौतमीये त्रयोदशोऽध्यायः
॥१३॥ शावमाशौचं दशरात्रम् ऋत्विग्दीक्षितब्रह्मचारि
णां सपिण्डानां· एकादशरात्रं क्षत्रियस्य द्वादशरात्रं वैश्यस्य अ
र्द्धमासमेके मासं शूद्रस्य तच्चेदन्तः पुनरापतेत् शेषेण शुद्ध्ये

स्वस्रादिशेषेषु त्र्यं प्रत्तासीति स्थितिः ॥ गोब्राह्मणहतानामप्येवं
राजक्रोधाच्च युद्धे प्रायानाशकप्राप्तानां स्त्रीणां विषोदकोद्बंधन
प्रपतनैश्चेच्छतां ॥ पिंडनिवृत्तिः सप्तमे पंचमे वा ॥ जनने प्येव
वं मातापित्रोस्तन्मातुर्वा ॥ गर्भमाससमा रात्रीः स्रंसने गर्भस्य
त्र्यहं वा ॥ श्रुत्वा चोर्ध्वं दशाह्याः पक्षिणी असपिंडयोनिसंबं
धे सहाध्यायिनि च ॥ सब्रह्मचारिण्येकाहं ॥ श्रोत्रिये चोपसं
पन्ने प्रेतोपस्पर्शने दशरात्रमशौचमभिसंधाय चैतदुक्तं वै
श्यशूद्रयोः ॥ आर्त्तवीष्वेवं पूर्वयोश्च त्र्यहं वा ॥ आचार्य तत्पुत्र
स्त्री याज्यशिष्येषु चैवं ॥ अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वो
वावरं तत्र शावोक्तमाशौचं पतितचंडालसूतिको

दक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचेलोदकोपस्पर्शनाच्छुद्ध्येत्॥ शुनश्च य
दुपहन्यादित्येके॥ उदकदानं सपिण्डैः कृतचूडस्य तत्स्त्रीणां च एके प्र
त्तानां॥ अधःशय्यासनिनो ब्रह्मचारिणः सर्वे॥ न मार्जयीरन्॥ न मांसं
भक्षयेयुरा प्रदानात्॥ प्रथमतृतीयसप्तमनवमेषूदकक्रिया॥
वाससां च त्यागः॥ अन्त्ये त्वन्त्यानां॥ दन्तजन्मादि मातापितृभ्यां
॥ बालदेशान्तरितप्रव्रजितासपिण्डानां सद्यः शौचं॥ राज्ञां च कार्यविरो
धात्॥ ब्राह्मणस्य च स्वाध्यायानिवृत्त्यर्थं स्वाध्यायानिवृत्त्यर्थं
॥ इति गौतमीये चतुर्दशोऽध्यायः॥ १४॥ अथ श्राद्धम् अमावा
स्यायां पितृभ्यो दद्यात्॥ पंचमीप्रभृति वापरपक्षस्य यथाश्रा
द्धं॥ सर्वस्मिन्वा द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमः

॥ शक्तितः स्वकर्येत्तगुणसंस्कारविधीनन्नस्य नवकवदान्भोज
येत् ॥ अयुजोयथोत्साहं वा ॥ श्रोत्रियायावरूपवयःशीलसं
पन्नाय ॥ युवत्यो दानं प्रथमं ॥ एकोपिज्यवत् ॥ नचात्र नामित्रक
र्मकुर्यात् ॥ पुत्रा वा वेश्यापिंडा मात्यसपिंडाः शिष्याश्च दद्युः ॥ त
दभावे ऋत्विगाचार्यौ ॥ तिलमाषव्रीहियवोदकदानैर्मासं पि
तरः प्रीणंति ॥ मत्स्यहरिणरुरुशशकूर्म·वराहमेषमांसैः
संवत्सराणि · गव्यपयःपायसैर्द्वादशवर्षाणि वार्ध्रीणसमांसे
नमांसेन कालशाक छागलोहखड्गमांसेन मधुमिश्रैश्चानं
त्यं नभोजयेत् स्तेनक्लीबपतितनतवृत्तिनास्तिकवीरहाग्रेदिधि
षूदिधिषूपतिस्त्रीग्रामयाजकाजपालोत्सृष्टाग्निमद्यपकु

गौ॰ ध॰ वरकूटसाक्षिप्रातिहारिकानुपपतिर्यस्य च सः ॥ कुंडाशी सोमवि श्राद्ध
१८ क्रय्यगारदाहिगरदावकीर्णिगणप्रेष्यागम्यागामिहिंस्रपरिवि १९
त्तिपरिवेत्तृपर्याहितपर्याधातृत्यक्तात्मदुर्वालखल्वाटकुनखिश्या
वदंतश्वित्रिपौनर्भवकितवाजपराजप्रेष्यप्रातिरूपिकशूद्रा
पतिनिराकृतिकिलासिकुसीदिवणिक्शिल्पोपजीविज्याबा
दित्रतालनृत्यगीतशीलान् ॥ पित्राचाकामेन विभक्तान् ॥ शिष्
यांश्चैके सगोत्रांश्च ॥ भोजयेदूर्ध्वं त्रिभ्यो गुणवंतं ॥ सद्यः श्राद्धी
शूद्रातल्पगस्तत्पुरीषे मासं नयति पितॄन् ॥ तस्मात्तदहं ब्रह्मचा त्र
रीस्यात् ॥ श्वचंडालपतितावेक्षणे दुष्टं तस्मात्परिश्रिते दद्या
त्‌ ॥ तिलैर्वा विकिरेत् पंक्तिपावनो वा शमयेत् ॥ पंक्तिपावनाः

॥ षंडगवित् । ज्येष्ठसामगा मंत्रब्राह्मणवित्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः पंचाग्निः
स्नातको मंत्रब्राह्मणवित् धर्मज्ञो ब्रह्मदेयानुसंतान इति ॥ हविः
षु चैवं दुर्बालादीन् श्राद्ध एवैके श्राद्ध एवैके ॥ इति गौतमीये पंचद
शोध्यायः ॥ १५ ॥ श्रावण्यादि वार्षिकं प्रोष्ठपदीं वोपाकृत्याधी
यीत छंदांस्यर्द्धपंचमान्मासान्पंच दक्षिणायनं वा ब्रह्म
चार्युत्सृष्टलोमा न मांसं भुंजीत ॥ द्वैमास्यो वा नियमः । ना
धीयीत वायौ दिवा पांसुहरे कर्णश्राविणि नक्तं ॥ बाणभेर
मृदंगगर्तार्त्तशब्देषु च श्वशृगालगर्दभसंह्रादे लोहितेंद्र
धनुर्नीहारेषु ॥ अभ्रदर्शने वापर्तौ ॥ मूत्रित उच्चारिते निशि
संध्योदकेषु ॥ वर्षति च एके वल्मीकसंतानं ॥ आचार्य

गौ॰ धर्म परिवेषरोज्योतिषोश्च ॥ तीतोयावन्तुः श्रायानःश्रौठपाद॥ श्मश्मशान शात्व
१९ ग्रामांतमहापथ्या श्रौचे कुसुतिग्रंधांनः शवादिवाकीर्त्यश्रुद्रसंनि १६
धाने मुत्र केचोद्गारे त्रवृग्यजुषांच सामशब्दोयावत् ॥ आकाल
लिकाः निर्घात भूमिकंपराहुदर्शनोल्काः ॥ स्तनयित्नुवर्षविद्यु
तश्चप्रादुःकृतास्विपु ॥ अहःत्सौविद्युति नक्तं चापररात्रात् ॥
त्रिभागादिप्रवृत्तो सर्वं नुत्कावविद्युत्समत्यकेषां ॥ स्तनयित्नुर
पराह्णे अपिप्रदोषे सर्वं नक्तमार्धरात्रात् ॥ अहःश्चेत्सज्योतिः
॥ विषयस्थेच राज्ञि प्रेते विप्रोष्य चान्योन्येन सह संकुलोपाहि
तवेदसमाप्तिः छर्दि श्राद्ध मनुष्ययज्ञ भोजनेषु अहोरात्रं अमा
वास्यायांच द्व्यहंवा ॥ कार्त्तिकीफाल्गुन्याषाढीपौर्णमा

सीतिस्रो स्त्रतात्त्रिरात्रं मंत्यामेके ॥ त्रतिलोवार्षिकं ॥ सर्वे वर्षा विद्युत्स्त
नयित्नु सन्निपाते त्र्यहं स्यंदिन्यूर्द्ध्वं भोजनादूर्द्ध्वं वेदाधीतस्यचानिघ्राणायां
चतुर्मुहूर्त्तं नित्यमेके नगरे मानस्तमप्पसुचिः श्राद्धिनामाकालिकं
॥ संस्कृतान्नप्राशने भोजने चाविपर्यासितपाणिराचामेदासंस्मारंवाचमेकेकाबुद्धीतिवर्तमानैः
तस्मवंति ॥ इति गौतमीये षोडशोऽध्यायः ॥ १६ ॥ प्रशस्ताना
स्वकर्मसु द्विजातीनां ब्राह्मणोभुंजीत ॥ प्रतिगृह्णीयाच्च ॥ १ ॥ एधो
दकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनावसथयानपयोद
धिधानाशफरिप्रियंगुस्रङ्मार्गशाकान्यप्रणोद्यानि सर्वेभ्यः
॥ पितृदेवगुरुभृत्यभरणेचान्यत् ॥ वृत्तिश्चेन्नांतरेणशूद्रात् ॥ पशु
पालक्षेत्रकर्षककुलसंगतकारयितृपरिचारकालोज्यान्नाः

गौ॰ध॰ वासिष्ठवासिष्ठी॰नित्यमतोऽन्यंके प्राकीटावपन्नंरजस्वलाह्मस शान्व
२॰ प्राकुनिपदोपहतं॥भूलप्रावेदितं॥गवाघ्रातंतावडुष्टं॥शुक्तंके १८
६= वलमधि॰पुनःसिद्धंपर्युषितमभक्ष्यकलवंप्रत्नेहमांसमधूनि॥
उत्सृष्टपुंश्चल्यलिभ्रस्तानपदेश्यदंडिकतक्षककदर्यबंधनिर
गणकचिकित्सकमृग—पुंचार्यौघ्रष्टलोजिगणविद्विषाम
पंक्त्यानां प्राककुड्वीलाग्रवृथान्नाचमतो ह्यानव्यपेतानि समा
समात्त्यांविषमसमेपूजातोऽन्नंचित्रंच॥गोश्च्छीरमनिर्दश
प्रायाःसूतके चजामहिष्याक्षीरंनित्यमभाविकमपेयमौष्ट्रमै
कशफंचस्यंदिनीयमसूसंधिनीनांचयाश्चव्यपेतवत्साः
॥पंचनखाश्चशल्यकपाशकाविहगोधावज्रकच्छपाःउल

यतोदत्कैश्यलोमैकशफकलविंकप्लवचक्रवाकहंसाः॥ काक
कंकगृध्रश्येनजलजरक्तपादतुंडाः॥ ग्राम्यकुक्कुटसूकराः धेन्व
नडुहौ चापन्नदद्दवसन्नवृथामासानि किसलयक्याकुलसुन
निर्यासलोहितावश्चनाश्च॥ निचुदारुबकबलाकाः शुकमद्गुटि
हिभमांधालनक्तंचराअभक्ष्याः भक्ष्याः प्रतुदाविष्किराजाल
पादाः॥ मत्स्याश्चाविकृतावध्याश्च धर्मार्थे व्यालहताद्द
ष्टदोषवाक्प्रशस्तानभ्युक्ष्योपयुंजीतोपयुंजीत॥ इतिगौ
तमीये सप्तदशोऽध्यायः॥ १७॥ अस्वतंत्रा धर्मे स्त्री नाति
चरेद्भर्तारं॥ वाक्चक्षुःकर्मसंयता अपतिरपत्यलिप्सु
र्देवरात् गुरुप्रसूता नर्तुमतीयात्॥ पिंडगोत्रर्षिसंब

गौ·ध·
२१

वंधेत्य॥ योनिमात्रा ह्यनादेवरादित्येके॥ नातिद्वितीयं जनयितुरप शास्त्र
त्यं· समयादन्यत्र जीवतश्च क्षेत्रे परस्मात्‌ तस्य द्वयोर्वा रक्षणात्तु भ १८
र्त्तुरेव नष्टे भर्त्तरि षड्वार्षिकं क्षपणं श्रूयमाणेऽभिगमनं प्रव्रजिते तु नि
वृत्तिः प्रसंगात्‌॥ द्वादश वर्षाणि ब्राह्मणस्य विद्यासंबंधे भ्रातरि
चैवं ज्यायसि यवीयान्‌ कन्याग्न्युपयमेषु षडित्येके॥ त्रीन्‌ कुमार्यृ
तूनतीत्य स्वयं युंज्येतानिंदितेनोत्सृज्य पित्र्यानलंकारान्‌
प्रदानं प्रागृतोरप्रयच्छन्दोषी· प्राग्वाससः प्रतिपत्तेरित्येके·
द्रव्यादानं विवाहसिद्ध्यर्थं धर्मतंत्रसंयोगे च शूद्रात्‌॥ अन्यत्रा
पि शूद्राद्‌बहुपशोर्हीनकर्मणः॥ शतगोरनाहिताग्नेः॥ स
हस्रगोर्वा सोमपात्‌॥ सप्तमीं चाभुक्त्वानिचयाय॥ अप्य

हीनकर्म्मत्यागः॥ आचवतीत राज्ञाप्युक्तस्तेन हि वर्त्तव्यः श्रुतशीलसं
पन्नश्चेद्धर्म्मतंत्रपीडायां तस्याकरणे दोषो दोषः॥ इतिगौतम
मीये अष्टादशोऽध्यायः॥१८॥ द्वितीयः प्रपाठकः॥ उक्तो वर्ण
धर्म्मश्चाश्रमधर्म्मश्च॥ अथ खल्वयं पुरुषो याप्येन कर्म्मणा
लिप्यते॥ यथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं
शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति॥ तत्र प्रायश्चित्तं कुर्या
न्न कुर्यादिति मीमांसन्ते न कुर्यादित्याहुर्न हि कर्म्म क्षीयं
त इति कुर्यादित्यपरे पुनःस्तोमेनेष्ट्वा पुनःसवनमायांती
ति विज्ञायते॥ व्रात्यस्तोमैरिष्ट्वा तरति सर्व्वं पाप्मानं तरति ब्र
ह्महत्यां योऽश्वमेधेन यजतेऽग्निष्टुताभिशस्यमानं याज

गौ.ध. २२ 72

जपेदिति च ॥ तस्य निष्क्रयणानि ॥ जपस्तपो होम उपवासो दानं उ शास्त्र
पनिषदो वेदान्ताः सर्व्वछंदःसु संहितामधून्यघमर्षणमथ १८
र्व्वशिरो रुद्राः पुरुषसूक्तं राजनरौहिणे सामनी बृहद्रथंतरे पु
रुषगतिर्महानाम्न्यो महावैराजं महादिवाकीर्त्यं ज्येष्ठसाम्ना
मन्यतमद्बहिष्पवमानं कूष्मांडानि पावमान्यः सावित्री
चेति पावमानानि ॥ पयोव्रतता शाकलक्षता फललक्षता प्र ना:
सृतयावको हिरण्यप्राशनं घृतप्राशनं सोमपानमिति
मेध्यानि सर्व्वे शिलोच्चयाः सर्व्वाः स्रवंत्यः पुण्या ह्रदास्तीर्था
नि ऋषिनिवासा गोष्ठपरिस्कंदा इति देशाः ॥ ब्रह्मचर्यं स
त्यवचनं सवनमुदकोपस्पर्शनमार्द्रवस्त्रताधःशायिता

स्नानं शाकं घृतितपयांसि॥ हिरण्यगोर्वा सोष्णो लक्ष्मीर्विस्विस चन्द्रम
न्त्रामितिदेयमिति॥ संवत्सरः परमायुरस्य स्वभावस्तथा पावकस्य तु
र्द्विपरास्त्यहो द्वादशाहः षडहस्त्र्यहो ह्यहोनात्र इति कालाः एतान्ये
नातादेशे विकल्पेनाक्रियेरन्नेनांसि गुरुणि गुरुणि लघूनि ल
घूनि॥ इति शातातपप्रोक्ते प्रायश्चित्तविधौ सर्वप्रायश्चित्तप्रायश्चि
त्तं॥ शातातपीये कर्मविपाके प्रथमोऽध्यायः॥१॥ अथ पचन्तुः
पापिष्ठयातनाभोगानेष्ठः स्वान्यनुरूपतंत्रेमान्निलक्षणानिभवं
ति॥ ब्रह्महा ईक्षुष्ठी सुरापः श्यावदन्तः गुरुतल्पगः पंगुः स्वर्णहा
री कुनखी श्वित्री वस्त्रापहारी दर्दुरी तेजोपहारी मंडली स्नेहापह
री ह्वयी पिता॥ अन्नजीर्णीवानन्नापहारी॥ ज्ञानापहारी मूकः॥ प्रति

गौ॰ध॰ हंतां गुल्मोरायस्मोरी॥ गोघ्नो जाल्मं धः पिशुनः सूतिनाशः॥ पूतिवक्त्रस्तु स्त्र शास्त्र
२२ वकः॥ मूढ्योपाध्यायः स्वपाकः॥ त्वचामरसास्तविक्रयी मषपः ९ २०
२७ कशापकविक्रयी मृगव्याधः कुंडाशी लुन्तक श्रोलिवान हात्रीयः श्वा
र्दीता[illegible]न्तिकोरं गोपजीव्यलद्ध लद्धीमं डु[illegible]लन्तस्क स कुरुपं
रणं कौशिकः॥ पिंडितः षंटो महापथ्यिको गंडिकः॥ चांडा
लो[illegible]लक नीगो श्वपकीरो मग्धामे हि धर्म्मपत्नी स्वस्यात्॥
मैथुनप्रवर्त्तकः स्वल्वाटः सगोत्रासमं[illegible]लिपामी स्त्रीप
दी॥ मात्रमाणिनी स्त्र्यालिमल्मी वीजितः स्नैषां कुंजकुंडमंड
व्याधितव्यंगदरिद्रालया ब्रध्योऽल्पबुद्धिः चंडपंडशौ त्वषनस्कर पपु
त्रयषड्व्यपरकर्मकरा॥ स्वल्वाट वक्त्रांगसंकीर्णाः॥ क्रूरकर्माणः

क्रमशश्चांत्याश्चोपपद्यंते ॥ तस्मात्कर्तव्यमेवेह प्रायश्चित्तं विशुद्धये
लक्षणैर्जायते धर्मस्य धारणादिति धर्मस्य धारणादिति ॥ इ
ति गोतमीये विंशतितमोऽध्यायः ॥ २० ॥ त्यजेत्पितरं राजघात
कं शूद्रयाजकं शूद्रार्थयाजकं वेदविप्लावकं भ्रूणहनं यश्चांत्या
वसायिभिः सह संवसेदंत्यावसायिन्यां वा तस्य विद्यागुरून्योनि
संबंधांश्च संनिपात्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युः ॥ पात्रं चा
स्य विपर्यस्येयुः ॥ दासः कर्मकरो वावकरादमेध्यपात्रमा सर्व=
नीय दासीघटात्पूरयित्वा दक्षिणाभिमुखः पदा विपर्यस्येद
मुमनुदकं करोमीति नामग्राहं तं सर्वेऽन्वालभेरन् प्राचीनावी
तिनो मुक्तशिखा विद्यागुरवो योनिसंबंधाश्च वीक्षेरन् । अ

पउपस्यश्रयेग्रामंप्रविशांति॰ अतऊर्द्ध्वंतेनमंत्ताध्यातिष्टेदेकरात्रंजपन्सा
वित्रीमज्ञानकृर्द्धचेत्रिरात्रंयस्तुप्रायश्चित्तेनशुद्धेन्नास्मिन्शुद्धेशां
नकुंभमयपंपात्रंपुरापतमानकुशात्स्त्रापयित्वास्तवंतीत्योवातत्रए
नमुपस्पर्शयेयुः॥ अपास्मैतत्पात्रंदद्युःतत्स्तंशांतिमत्य
जपेत्॥ शान्ताद्यौःशान्तापृथिवीशांतांतरीक्षंमंतानारिद्धंयोरोर
चनस्तामिहगर्ङ्कामीत्यंतेःयनुलिंस्तरक्षमंदीतिःपावमानी
भिःकूश्मांडैश्चान्यैनुंहयात्॥ हिरण्यंब्राह्मणायदद्यात्॥ गांर
चार्योयाय॥ यस्यतुप्राणांतिकंप्रायश्चित्तंसमृतःशुद्धेत्तस्सर्वा
णेवतास्मिन्तुदकादीनिप्रेतकर्माणिकुर्युः॥ एतदेवशांत्युद
कंसर्वेस्रपपातकेषुसर्वेछूपपातकेषु॥ इति गोतमीये २

काविंशोऽध्यायः॥२१॥ [illegible] ब्रह्महाः
रापगुरुतल्पगमात्रपित्रयोर्निसंबंधागस्तेनना स्तिकनिंदित
कर्माभ्यासी पतिता त्यागपति तात्यागिनः पतिताः॥ पातक
संयोजकाश्च॥ तैश्चाब्दसमाचरन्॥ द्विजातिकर्म्मभ्यो हानिः
पतनं॥ परत्र चासिद्धिः॥ तमेके नरकं त्रीणि प्रथमान्यनि र्देश्यानि
तिमनुः॥ नस्त्रीष्वगुरुतल्पं पठन्तीत्येके॥ भ्रूणहनि हीनवर्णसे
वायां च स्त्री पतति॥ कौटसाक्ष्यं राजगामि पैशुनं गुरोरनृताभि
शंसनं पातकसमानि॥ अपपात्रा नां प्राग्दुर्वालात्॥ गोहन्तृब्रह्मह
भूलनमंत्रकृदवकीर्णिपतितसावित्रीकेषूपपातकं॥ याजनाध्या
पनादृत्विगाचार्यौ पतनीयसेवायां च हेयौ॥ अन्यत्र हानात्प

गौ॰ध॰ २५ शास्त्र

25

नानि ॥ तस्य च प्रतिगृहीतेत्येको न कर्हिचिन्मातापित्रोरवृत्तिः ॥ दाय

यं तु न लभेरन् ॥ ब्राह्मणाभिशंसने दोषस्तावान् ॥ द्विरनेनसि ॥ दुर्ब २२

लहिंसायां चाविमोचने शक्तश्चेत् ॥ अभिक्रुद्धावगोरणं ब्राह्मण

स्य वर्षशतमस्वर्ग्यं निपातने सहस्रं ॥ लोहितदर्शने यावतस्तत्

स्कंदयेत्पांसून् संगृह्णीयात्तावतः संगृह्णीयात् [illegible]

विंशोऽध्यायः ॥ २२ ॥ प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छात

स्य लक्ष्यं वा स्याज्जन्ये शस्त्रभृतां ॥ खट्वांगकपालपाणिर्वा द्वादश

संवत्सरान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत्कर्माचक्षाणः ॥

पथोपक्रामेत्संदर्शनादार्यस्य स्थानासनाभ्यां विहरन्

सवनेषूदकोपस्पर्शनाच्छुध्येत् प्राणलाभे वा तन्निमित्ते ब्रा

लग्णास्यकृच्छ्राप जयेवास्यन्नरंप्रतिराद्धः॥ सप्तमे याज्ञवल्क्ये वाचयन्तोपनिष
दंन्तथैव च॥ स्वकृच्छ्रेमेवब्राह्मणावधो हत्वापि॥ आत्रेय्यां चैवं॥ गर्भे चाविज्ञा
तेब्राह्मणस्य॥ राजन्यवधे षडब्दार्षिकं प्राकृतंब्रह्मचर्य्यं त्र्यषभैकस्त इ
स्त्राश्च गादद्यात्॥ वैश्ये त्रैवार्षिकं त्र्यषभैकशतानाश्चगा दद्यात्॥ शू
द्रे संवत्सरं त्र्यषभैकादशगा दद्यात्॥ अनात्रेय्यां चैवं॥ गां चवै
श्यवत्मंडूक नकुलकाकबिंवदहरं मूषिकश्वा हिंसासु च॥ अस्थि
मतां सहस्रं हत्वा अनास्थिमतां मनडुहा रेच॥ अपि वास्थिमतामे
कैकस्मिन् किंचि द्दद्यात्॥ षंडे पलालं भारः सीसमाषकश्च॥ वराहे
घृतघटः सर्प्पे लोहदंडः॥ ब्रह्मबंधौ चललनायां जीला॥ वैशिके
न किंचित्॥ तल्पान्न धनलाभवधेषु पृथग्वर्षाणि॥ द्वेपरदारे

श्रीतिश श्रोत्रियस्य॥ द्रव्यलाभे चोत्सर्गः॥ यथा स्थानं वागमयेत्॥
॥ प्रातिविद्ध मंत्रयोगे सह स्त्रवाक श्वेत्॥ अप्सुत्सादि निराकृत्युप
पातकेषु चैवं॥ स्त्री चातिचारिणीषु प्रा॰ पि एडं तुल तैत अमात्
त्रीषु गोवर्जं स्त्रीकृते कूष्माण्डैर्घृतहोमो घृतहोमः॥ इति गौत
मीये त्रयोविंशतितमोऽध्यायः॥ २३॥ उदपस्य ब्राह्मणाः
स्योत्साममासि चेपुः उ॰ ामास्येम न्नः पुत्रो न्न॥ अमत्यापाते
पयो घृत उदकं वायु प्रति त्र्यहं तप्त प्रा तिस कृच्छ्र स्त तोत्यसं
स्कारः॥ स अशुरीयरेतसां च प्राश्ने॥ स्यावदो कुनखरारणो चा
गस्य॥ यामे कुक्कुट सूकरयो श्व॥ गंधाघ्राणे सुरापस्य प्राणा
यामो घृत प्राशनं च॥ पूर्वैश्च दष्टस्य॥ नाभे लोह वायने उत्त

स्यगः शपीत॥ सर्मद्विलंतीचाप्निष्येत॥ लिंगंवासहृपरागमु॰ कृत्यां जला
वाधायदद्गिणा प्रतीचीं दिशंव्रजेत् अजिनं त्यमशरो रानिपात्तात् स्चतः
प्रक्रेत॥ स्वरवीसयोनिसगेवाशिष्य तायात्तुभायांगाध चतल्पसमः
॥ त्रवकरहत्येके॥ चालि र॥ रस्ये ड्रू॰ नवरीगमनेद्विवियंप्रकाशंपुन ज्ञाति
मांसंघानयेत्॥ यचोक्तवाग्रहलीनावकीरणी निर्झतिं चतुष्पथे
यजेत्॥ तस्याजिनमूर्द्ध्ववालंपरिधाय लोहितपात्रः सप्तगृहा
न् लैक्ष्यं चरेत् कर्माचक्षाणोः संवत्सरेण प्रक्रेत॥ रेतस्कंदनेभये
रोगेत्वप्नेग्नीं घृतलैक्षचरणं निसन्न रात्रमष्ठत्वाज्यहोमः क्षामि
धोवारेत्नस्याल्पां॥ सूर्याभ्युदितोब्रह्मचारीतिष्ठेदहरभुंजानो
स्तमितश्च रात्रिं जपन्सावित्रीं॥ अशुचिं दृष्ट्वादित्यमीक्षेत

गौ॰ ध॰ २७ — शास्त्र २४

28

प्राणायामं कृत्वा ॥ अब्लिङ्ज्यतोज नोनि पृथिवी तावः शिरा आवरस
भोजनं सत्ररात्रं वा स्वयं शीर्णान्युपभुञ्जानः फलान्यतिकामतः
॥ प्राक् पंचनखेभ्यः छर्दनं घृतप्राशनं च ॥ आक्रोशानृतहिंसा
सु त्रिरात्रं परमं तपः ॥ सत्यवाक् चेद्वारुणीभिः पावमानी
तिर्होमः ॥ विवाहमैथुननर्मार्त्तिसंयोगेष्वदोषमेके ऽनृतं तु
खलु गुर्वर्थे सप्तपुरुषानितश्च परतश्च हन्ति मनसापि गुरो
रनृतं वदन्नल्पेष्वप्यर्थेषु ॥ अन्त्यावसायिनीगमने कृच्छ्राब्दः
॥ अमत्या द्वादशरात्रं ॥ उदक्यागमने त्रिरात्रं ॥ इति गौतमीये
चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ रहस्यं प्रायश्चित्तमविख्या
तदोषस्य चतुर्ऋचं तरत्समन्दीत्यप्सु जपेदप्रतिग्राह्यं

पीडिश्चूद्रान्न प्रतिग्रहस्य वा॥ अंतोऽयंतु भुक्तमात्रः ए स्थिर
वीभावपेत॥ नत्वं नदारमरणात्तु दकोपस्पर्शनाशुद्धिः॥ एको
द्दिष्टभुक्षपयोव्रतोवा थादशरात्रं चरेतेन द्वितीयमोऽद्रितृतीये
दिवादिवैकलनिकोजलालिन्ववासाः लोमातिनरवानिच
चर्मांसं शोणितं स्नायवस्थिमज्जानामिति होम आत्मनो
मुखेमृत्योरास्येजुहोमीत्यंततः सर्वे आमेतन्नायाश्चित्तं ब्रह्महत्यायाः॥
अथान्यत्तु कोनियमः॥ अग्नेत्वंपारयेत्रिमहाव्याहृतिभिर्जुहु
यात कूष्मांडे आज्यंतहुतएववा॥ ब्रह्महत्यासुरापानस्ते यगुरुतल्प
गुप्राणायामैः स्नातोघमर्षणंजपेत्॥ सम्यक्षमेघावलपेत
॥ सावित्री वासहस्त्रं हात्वा आवर्त्तयन्पुनीतेहे वात्मानं॥ अं

गौ. ध. तद्भूलिकायसर्वेषांत्रिरात्रव्रतंयत्सर्वपापेभ्योमुच्यते॥इतिगौतम शास्त्र
२८ मीये पंचविंशतितमोऽध्यायः॥२५॥ तदाहुः कति धावकीर्णी २६
25 प्रविशन्तीति॥ मरुतः प्राणेनेन्द्रं बलेन बृहस्पतिं ब्रह्मवर्च
सेनाग्निमेवेतरेण सर्वेणेति सोमावास्यायां निश्यग्निमुप
समाधाय प्रायश्चित्ताज्याहुतीर्जुहोति॥ कामावकीर्णोऽस्म्यव
कीर्णोऽस्मि काम कामाय स्वाहा॥ कामाभिदुग्धोऽस्म्यभिदुग्धो
ऽस्मि काम कामाय स्वाहेति॥ समिधमाधायानुपर्युक्ष्य यज्ञवा
स्तु कृत्वोपोत्थाय समासिंचंत्वित्येतया त्रिरुपतिष्ठेत॥ त्रय इ
मे लोका एषां लोकानामभिजित्या अभिक्रान्त्या इति एतदेवै
केषां कर्माधिकृत्य योऽपूत इव स्यात्स इत्थं जुहुयादित्थम

तुमंत्रयेत्सवरो दक्षिणेनेति प्रायश्चित्तमविप्रो यात् ॥ अत ऊर्ध्वं वैपेषु न प्रति
ष्ठित्प्राचारानाच प्राशानेभुमूत्रूयोचरेतु:सि त्वकायो नौपवाति कर्म
ए पत्निसंधि पूर्वं प्या पूर्णाभिरपतु ... प्रोक्षाकरणीति रच्चे वीपवित्रैः
प्रतिषिद्धे वाङ्मनसयोरप्यचारे व्याहृतयः ॥ पंचसत्यान्नाःसर्वा
त्त्वपोवाचामेदहश्च मादित्यश्च पुनातु चेति प्रातः ॥ रात्रिश्च मा वरु
णश्च पुनातु चेति सायः ॥ अष्टौ वा समिधमाद ध्या द्देवकृतस्येति
हुत्वैव सर्वस्मादेनसो मुच्यते मुच्यते ॥ इति गोभिलीये षड्विंशो ध्या
यः ॥ २६ ॥ अथातः खण्डव्याख्यास्यामः ॥ हविष्यानृतत्वा
शानं भुक्त्वा तिस्रो रात्री नाश्नीयात् ॥ अथापरं त्र्यहं नक्तं भुंजी
त ॥ अथापरं त्र्यहं न कंचनयाचेत् ॥ अथापरं त्र्यहमुपवसेत् ॥
चदो:

गौ॰ध॰ २९ तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेत् ॥ अनार्यैर्न संभा शास्त्र २७
षेत ॥ रौरवयौधाजये नित्यं प्रयुंजीत ॥ अनुसवनमुदकोपस्प
र्शनं ॥ आपो हि ष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयेत ॥ हिर
ण्यवर्णाः शुचयः पावका इत्यष्टाभिः ॥ अथोदकतर्पणं ॥
ॐ नमो हमाय मोहमाय मंहमाय धून्वते तापसाय पुनर्वस
वे नमो नमो मौंज्यायोर्व्याय वसुविंदाय सर्वविंदाय नमो नमः
पाराय सुपाराय महापाराय पारयिष्णवे नमो नमो रुद्राय पशु
पतये महते देवाय त्र्यंबकायैकचरायाधिपतये हराय शिवाय श
शानायोग्राय वज्रिणे घृणिने कपर्दिने नमः नमः सूर्यायाः
दित्याय नमः नमो नीलग्रीवाय शितिकंठाय नमः ॥ नमः कृ

स्नायपिंगलायनमः॥नमोज्येष्ठाय श्रेष्ठाय वृद्धायेंद्राय हरिकेशायो
र्द्ध्वरेतसे नमः॥नमः सत्याय पावकाय पावकवर्णाय नमः॥नमः
कामाय कामरूपिणे नमः॥नमो दीप्ताय दीप्तरूपिणे नमः॥नम
स्तीक्ष्णाय तीक्ष्णरूपिणे नमो नमः सौम्याय सुपुरुषाय महापु
रुषाय मध्यमपुरुषायोत्तमपुरुषाय नमः॥नमो ब्रह्मचारि
णे नमः॥नमश्चंद्रललाटाय नमो नमः कृत्तिवाससे पिना
कहस्ताय नमो नमः इति॥एतदेवादित्यो पस्थानं॥एता एव
वाज्याहुतयः॥द्वादशरात्रस्यांते चरुं श्रपयित्वैताभ्यो देवता
भ्यो जुहुयात्॥अग्नये स्वाहा॥सोमाय स्वाहा॥अग्नीषो
मीयाभ्यां स्वाहा॥इंद्राग्निभ्यां मित्राय॥विश्वेभ्यो देवेभ्यो ब्रह्म

स्यो प्रजापतये ऽग्नये स्विष्टकृते इति॥ अथ यद्ब्राह्मणानर्प्यणे॥ ए
तेनैवातिकृच्छ्रो व्याख्यातः॥ यावत्सकृदाददीत तावदश्नी
यात्॥ अब्भक्षस्तृतीयः॥ स कृच्छ्रातिकृच्छ्रः॥ प्रथमं चरित्वा
शुचिः पूतः कर्मण्यो भवति॥ द्वितीयं चरित्वा यदन्यन्म
हापातकेभ्यः पापं कुरुते तस्मात्प्रमुच्यते॥ तृतीयं चरित्वा
सर्वस्मादेनसो मुच्यते॥ अथैतांस्त्रीन्कृच्छ्रान् चरित्वा स
र्वेषु वेदेषु स्नातो भवति॥ सर्वैर्देवैर्ज्ञातो भवति॥ यश्चैवं
वेद॥ इति गौतमीये सप्तविंशतिमोऽध्यायः॥ २७॥ अ
थातश्चान्द्रायणं॥ तस्योक्तो विधिः कृच्छ्रे॥ वपनं व्रतं चरेत्॥ श्वोभूतां
पौर्णमासीमुपवसेत्॥ आप्यायस्व संते पयांसि नवो नव इति चै

नातिस्तर्पणमाज्यहोमोहविषश्चानुमंत्रणं॥उपस्थानंचचन्द्रमसः॥च
द्दवादेवहेडनमितिचतस्त्रलिवाज्यंजुहुयात्॥देवकृतस्येतित्रिचौत्तसमि
द्भिः॥ॐभूर्भुवःस्वःतपःसत्यंयशःश्रीरूर्गिरौजस्तेजोधर्मःपुरुषोय
र्मःशिवइत्येतैर्ग्रसानुमंत्रणंप्रतिमंत्रंमनसानमःस्वाहेतिवासर्वान्
ग्रासग्रासमात्रास्यादविकारेणचरुभैक्षसक्तुकणयावकशाकपयो
दधिघृतमूलफलोदकानिहवींषिउत्तरोत्तरप्रशस्तानिपौर्णमास्यां
पंचदशग्रासानमुक्त्वैकापचयेनापरपक्षमश्नीयात्॥अमावा
स्यायांचपौष्येकोपचयेनपूर्वपक्षं॥विपरीतमेकेषां॥एषचान्द्रा
यणोमासः॥एतमाप्त्वाविपाप्मासर्वमेनोहंति॥द्वितीयमाप्त्वा
दशपूर्वान्दशापरानात्मानंचैकविंशंपंक्तिंचपुनाति॥संवत्सर

गौ॰ध॰ ३१ माब्राचंद्रमसः सलोकतामाप्नोत्याप्नोति ॥ इति गौतमीये धर्मशास्त्रेऽष्टाविं शास्त्र

शतितमोऽध्यायः ॥ २८ ॥ ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन् ॥ निवृत्ते र २९

जसि मातुर्जीवति चेच्छति सर्वं वा पूर्वजस्येतरान्बिभृयात्पि

तृवत् ॥ विभागे तु धर्मवृद्धिर्विंशतिभागो ज्येष्ठस्य मिथुनमु गौ॰

भयतो दद्युक्तो रथो गोवृषः काणखोरकूटवण्डा मध्यमस्या

नेकाश्चेत् ॥ अविर्धान्यायसी गृहमनो युक्तं चतुष्पदां चैकै

कं यवीयसः समधेतरत् सर्वं द्व्यंशी वा पूर्वजः स्यात् एकैक

मितरेषां एकैकं वा काम्यं पूर्वः पूर्वो लभेत दशतः पशूनां चैक

शफा द्विपशवो वृषभोऽधिको ज्येष्ठस्य ॥ वृषभषोडशा ज्यै

ष्ठिनेयस्य समं वा ज्यैष्ठिनेयेन यवीयसां प्रतिमातृ स्ववर्गे

31

तस्माविशेषं पितास्टजेत् पुत्रिकामनपत्योग्निं प्रजापतिं चेष्ट्वामद्
र्थमपत्यमिति संवाद्याभिसंधिमात्रात्पुत्रिकेत्येकेषां ॥ तत्सं
शयान्नोपयच्छेताभ्रातृकां पिंडगोत्रर्षिसंबंधिरिक्थं भजेरन् ॥ स्त्री
वानपत्यस्य बीजं वा लिप्सेत ॥ देवरत्यामन्यजातमभागं ॥ स्त्रीधनदु
हितॄणामप्रत्तानामप्रतिष्ठितानां च भगिनीशुल्कः सौदर्याणामू
र्ध्वं मातुः ॥ पूर्वं चैके ॥ असंसृष्टिविभागः प्रेतानां ज्येष्ठस्य ॥ संसृष्टि
ति [illegible] प्रेते संसृष्टी रिक्थभाक् ॥ विभक्तजः पित्र्यमेव स्वयमर्जितम
वैद्येभ्यो वैद्यः कामं न — न ॥ अवैद्याः समं विभजेरन् ॥ पुत्रा औरस
क्षेत्रदत्तकृत्रिमगूढोत्पन्नापविद्धा रिक्थभाजः ॥ कानीनसहोढ
पौनर्भवपुत्रिकापुत्रस्वयंदत्तक्रीता गोत्रभाजः ॥ चतुर्थांशिन

गौ॰ध॰ श्रौरसा तावद्ब्राह्मणश्च राजन्यापुत्रो ज्येष्ठो गुणसंपन्नस्तुल्यभाक्॥ शास्त्र
३२ ज्येष्ठांशहीनमन्यत्॥ राजन्यावैश्यापुत्रसमवाये यथा स ब्राह्म २८
32 णीपुत्रेण क्षत्रियाच्चेत्॥ शूद्रापुत्रोप्यनपत्यस्य शुश्रूषुश्चेत्॥
लभेत वृत्तिमूलमंतेवासिविधिना सवर्णापुत्रोप्यन्यायवृत्तो
न लभेत नैकेषां ब्राह्मणस्य श्रोत्रियास्त्वनपत्यस्य रिक्थं भजेरन्
॥ राजेतरेषां जडक्लीबौ भर्तव्यौ अपत्यं जडस्य भागार्हं शूद्रा
पुत्रवत्प्रतिलोमासु॥ उदकयोगक्षेमकृतान्नेष्वविभागः स्त्री
षु च संयुक्तासु अनाज्ञाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः।
प्रशस्तं कार्यं॥ चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमास्त्रय आश्रा
श्रमिणः पृथग्धर्मविदस्त्रय एतान्दशावरा व्याचक्षते।

॥अत्र संभवेत्येतेषां श्रोत्रियो वेदवित् शिष्टो विप्रतिपन्नौ यत्तो
यत्र प्रतिपत्तौ तत्तत्ता हिंसा नुग्रहयोगिकु धार्मिष्टां विशे
षेण स्वर्गलोकं ॥ धर्मविदाप्नोति ॥ ज्ञानाभिनिवेशाभ्या
मिति धर्मो धर्म ॥ इति गौतमीये धर्मशास्त्रे नवविंशोऽ
ऽध्यायः ॥ २९ ॥ समाप्तमिदं शास्त्रम् ॥ शुभं भूयात् सर्वजगतं
संवत् १९८२ ज्येष्ठ प्रविष्टे २७ मम: ग्रंथ ॥ शुभमस्तु ॥ श्रीरस्तु
लि० पुरोहित नसा धुराम मुला आलिखवारी मंदिर श्रीरघु प
जीयुक्तकाल यजम्बूस्टेट ॥:॥:॥ ॥ ॥:॥:॥ ॥ ॥:॥:
ऽऽऽ:

गौतमीय धर्मशास्त्र की मौजूदा पुस्तक नं. २६०१ पर जो जमा है वह जीर्ण हो चुकी है इसके बजाये यह पुस्तक लिखवाई मंदिर से लिखवाई जाकर नं. २६०१ डा[illegible] के मुताबिक पुस्तकालय मंदिर में सं. ८३ ज्येष्ठ कृ. २९ को दाखिल की गयी

सं. ८२ ज्ये. २९ लिखवाना [illegible]

मंदिर

पत्रसंख्या ३२

श्लो॰ ५६२

गौतमीयधर्मशास्त्रम् नम्बर २६०१